# पौरस्त्यसाहित्यशास्त्रसम्प्रदायसमीक्षणम्

गुरुप्रसादकोइराला, विद्यावारिधिः

सहप्राध्यापकः, साहित्यविभागः

पिण्डेश्वरविद्यापीठम्

धरान-नेपालः

*koiralaguru32@gmail.com*

Reviewing the Constituents of Eastern Literature
- by Dr. Guru Prasad Koirala

The article reviews the principle of Eastern literature from the perspective to the elemental components like *rasa*, metaphor, stylistics, acousticism, sarcasm, and rationalism. This article reviews the norms of these literary elements of Eastern literature.

**लेखसारः**

*पौरस्त्यकाव्यशास्त्रस्य विकासपरम्परा प्राचीनतमा विद्यते । कस्यामपि साहित्यपरम्परायां संरचिताः कृतयः साहित्यरसिकजनमनांसि ब्रह्मानन्दसहोदराभ्यन्तरानन्दप्रदा भवेयु इत्युद्दिश्य विद्वद्भिः कृतिनिर्माणे सावधानतया विचारणीया विषया प्रस्तुताः । तादृशा विषयसम्बद्धा ग्रन्था एव काव्यशास्त्रम् इति नाम्ना व्यवह्रियन्ते । संस्कृतसाहित्यशास्त्रेऽपि प्रणेतृजनैः सत्कृतिनिर्माणेऽवलम्बनीया विषयनियमाः समुद्धृता विद्यन्ते । पौरस्त्यकाव्यशास्त्रज्ञैर्विद्वद्भिः शास्त्रीयग्रन्थेषु कृतिस्वरूपनिर्माणसन्दर्भे तत्रावश्यकानां तत्त्वादीनामपि सविस्तारेण चर्चा विहिता । तेषामेव तत्त्वानां प्राधान्यविषये बहवो मतभेदाः सञ्जाताः । अस्यैव मतभेदस्य फलरूपेण पौरस्त्यकाव्यशास्त्रे सम्प्रदाय इति नाम्ना विचारसमवायो विकसितः । अधुना पौरस्त्यकाव्यशास्त्रे रससम्प्रदायः, ध्वनिसम्प्रदायः, अलङ्कारसम्प्रदायः, रीतिसम्प्रदायः, वक्रोक्तिसम्प्रदायः, औचित्यसम्प्रदायश्चेति सम्प्रदायरूपेण षट्सङ्ख्यका विचारवर्गाः समुपलभ्यन्ते । अस्मिन् आलेखे पौरस्त्यकाव्यशास्त्रे प्रसिद्धानामेतेषां सम्प्रदायानां विषये चर्चा क्रियते ।*

**शब्दकुञ्जिका**

काव्यशास्त्रम्, रसः, ध्वनिः, अलङ्कारः, रीतिः, वक्रोक्तिः, औचित्यम्, सम्प्रदायः ।

## विषयप्रवेशः

कस्यापि भाषाया वाङ्मयं नियमबद्धं सुव्यवस्थितञ्च भवितुमर्हति । वाङ्मयस्य शास्त्रीयभेद एव भाषिकरचनायां सुव्यवस्थां निर्धारयति । शास्त्रीयनियमेन विना साहित्यपरम्परा अव्यवस्थिता अराजकरूपा च भवति । प्लेटोनामधेयः पाश्चात्त्यसमालोचकस्तु नैतिकादर्शहीनमराजकसाहित्यं गर्हणीयं त्याज्यं चोद्घोषयति । अतः शास्त्रीयनिर्देशोऽपरिहार्य एव । भाषावाङ्मयस्य शास्त्रीयभेद एव सत्साहित्यविकासार्थं मार्गं निर्दिशति । काव्यरचनायां यानि तत्त्वान्युपयुज्यन्ते तानि सर्वाणि काव्यशास्त्रं समीक्ष्यते । तस्मात् कस्यापि वाङ्मयस्य शास्त्रभेदस्य विकासोऽपरिहार्यो भवति । संस्कृतसाहित्य-शास्त्रस्य विकासपरम्परा सुदीर्घतरा विद्यते । तत्र काव्यशास्त्रिणः प्रौढतर्कशक्त्या पृथक् पृथक् मतविभागोऽजायत । त एव परिपुष्टा विदुषां विचाराः सम्प्रदायरूपेण विकसिता दृश्यन्ते । लोकेऽपि धर्मगुरुभिः स्थापिता वैष्णवादिधार्मिकसम्प्रदायाः विकसिता दृश्यन्ते, साहित्यशास्त्रेऽपि तयैव शैल्या लक्षणशास्त्रज्ञैर्विद्वद्भी रसध्वन्यादिसम्प्रदायसन्दोहः प्रारब्धः । विविधसिद्धान्तसम्प्रदायविकासेन संस्कृतकाव्यशास्त्रस्य गरिमा वर्धतेतराम् । अनेनैव कारणेन संस्कृतकाव्यशास्त्रस्य महत्त्वं विश्ववाङ्मयेऽग्रिमपङ्क्तौ गण्यते । समृद्धरूपेण विकसिता सम्प्रदायपरम्परा संस्कृतकाव्यशास्त्रस्य जीवितभूता मन्यते । अस्माकं सम्प्रदायपरम्परायाः प्रभावः पाश्चात्त्यसमालोचनापरम्परायामपि दृश्यते । भरतस्य नाट्यशास्त्रस्यौदार्यं विवेचनविषयकं तथ्यमवलोक्यैव तत्र सौन्दर्यशास्त्रमिति सम्पूर्णवाङ्मय-विवेचनयोग्यं समीक्षाशास्त्रं विकसितमिति मन्यते । नाट्यशास्त्रमेवास्माकं शास्त्रीयेतिहासस्याधारोऽस्ति । अधुना विकसिता ये सिद्धान्तसम्प्रदायाः सन्ति, तेषां सर्वेषां बीजं नाट्यशास्त्रमेव लभ्यते । रससम्प्रदायस्य प्रवर्तकोऽपि भरत एव । नाट्यशास्त्रादौपचारिकरूपेण प्रारब्धा पौरस्त्य-साहित्यशास्त्रीयपरम्परा रस-ध्वनि-अलङ्कार-रीति-वक्रोक्ति-औचित्यरूपान् सम्प्रदायविभवान् प्राप्य विश्ववाङ्मये स्वकीयं गौरवं प्रस्तौति । पौरस्त्यसमालोचनापरम्परायां सम्प्रदायः प्रस्थाननाम्नापि कथ्यते । 'रसोऽलङ्काररीती च ध्वनिर्वक्रोक्तिरेव च, औचित्यं चेति काव्यस्य प्रस्थानानि क्रमेण षट् ॥' (त्रिपाठी, १९९९ : ११)

## समस्याकथनम्

पौरस्त्यसाहित्यशास्त्रे सम्प्रदायपरम्परा विदुषां प्रौढपाण्डित्यजन्या मन्यते । तत्र सम्प्रदायप्रवर्तका विद्वांसः पाण्डित्यपूर्णतार्किकविचारबलेन काव्यकृतेः प्राधान्यत्वेन प्राक् स्थापितं तत्त्वमतिरिच्य विद्वत्समवायैरनुमोदकं पृथक् तत्त्वप्रधानं सम्प्रदायं स्थापयन्त्येव । अनेनैव विधिना संस्कृतकाव्यशास्त्रे प्रसिद्धाः षट् सम्प्रदाया अत्र समीक्ष्यन्ते । संस्कृतकाव्यशास्त्रे विदुषां प्रौढतर्कशक्त्या

स्थापितानां सम्प्रदायप्रकाराणां स्वरूपं किम् ? तेषां गणनाया बीजं किम् ? इति जिज्ञासा एवास्यालेखस्य समस्या विद्यते ।

## उद्देश्यम्

समस्यायामेतस्यां समागतानां जिज्ञासानां समाधानमेवाध्ययनस्योद्देश्यं भवति । अस्यालेखस्योद्देश्यमत्र सूत्ररूपेण निर्दिष्टं विद्यते, यत्-

क. पौरस्त्यसाहित्यशास्त्रपरम्परायां प्रसिद्धसम्प्रदायपरम्परायाः परिचयप्रकाशनम् ।

ख. रसादिसम्प्रदायस्थापनाया बीजतत्त्वप्रकाशनम् ।

## सीमाङ्कनम्

संस्कृतसाहित्यशास्त्रे सम्प्रदायविवेचनस्य सुदीर्घतराः परम्परा विद्यते । एकस्यैव सम्प्रदायस्य महत्त्वमुद्दिश्य बृहत् ग्रन्था निर्मिता विद्यन्ते । अत्र तु संस्कृतकाव्यशास्त्रे प्रथिता ये षट् सम्प्रदायाः सन्ति, तेषां परिचयप्रकाशनपूर्वकं स्थापनाबीजविषयश्च विविच्यते ।

## अध्ययनविधिः

अस्य लेखस्योद्देश्यपरिपूरणार्थं पुस्तकालयीयानां सामग्रीणामुपयोगो विहितः । सामग्रीणामध्ययनक्रमे समीक्षण-विश्लेषण-तुलनात्मिकाभिः पद्धतिभिश्च विविच्य सामान्यीकरणेन निष्कर्षो निस्सारितः ।

## पूर्वाध्ययनम्

पौरस्त्यकाव्यशास्त्रस्येतिहासपरम्परायां संस्कृतभाषायामेव सम्प्रदायपरम्परायाः समीक्षा स्पष्टतया नोपलभ्यते । पश्चवर्तिभिराचार्यै रसादिविचारसन्दोहस्य नामकरणं सम्प्रदायरूपेण कृतम् । पौरस्त्यसाहित्यशास्त्रे सम्प्रदायनिर्माणपरम्परा प्राचीनकालादेव प्रारब्धा परं सम्प्रदायरूपेण विवेचनपरम्पारा तु नवीना एव । अधुना पौरस्त्यकाव्यशास्त्रस्य हिन्दीभाषायां नेपालीभाषायां चसमालोचना क्रियते । तत्र पौरस्त्यसम्प्रदायपरम्परायाः सुविस्तृता चर्चा लभ्यते । अत्र पौरस्त्यसम्प्रदायविषये विद्वद्भिः कृतमध्ययनमत्रोल्लिख्यते ।

पाश्चात्त्यसमालोचकः श्रीनिवासशास्त्री काव्यप्रकाशस्य भूमिकायामलङ्कार-सम्प्रदायस्योत्पत्तेर्विषये उल्लिखति, यत्- पौरस्त्यकाव्यशास्त्रे काव्यस्वरूपविषये मतभेदाः सञ्जाताः । तत्र काव्यस्यात्मा किमिति विषये स्वकीयान् मतान्नुपस्कुर्वन्तो विद्वांसः पृथक् पृथक् सिद्धान्तं स्थापितवन्तः । एते काव्यात्मविषयमवलम्ब्य प्रस्तुता प्रौढा धारणा एव सम्प्रदायरूपेण विकसिता । एष समालोचकस्तत्र षट्सम्प्रदायविषयं सविस्तारेणोल्लिखति । (शास्त्री, २०४० : ३२)

नैपालः पौरस्त्यसमालोचको लोकमणिदाहालः मञ्जुसंस्कृतव्याख्यासमलङ्कृतस्य साहित्यदर्पणस्य भूमिकायां संस्कृतसम्प्रदायस्योत्पत्तेर्बीजविषयमुल्लिखति । पूर्ववर्त्तिनः सिद्धान्तस्य विषये किञ्चित् न्यूनत्वमेव नवीनसिद्धान्ताविष्कारे कारणं भवति । 'भिन्नरुचिर्हि लोकः' इत्यनुसारं रुचेर्भेद एव सिद्धान्तभेदं जनयतीति ज्ञायते । काव्यशास्त्रेऽपि लक्षणशास्त्रिणां रुचेर्भेदेन नवनवसिद्धान्तः सञ्जातः । एत एव सिद्धान्ताः सम्प्रदायरूपेण विकसिताः । (दाहालः, १९९५ : ५)

पौरस्त्यसमालोचकः कृष्णमणित्रिपाठी चन्द्रालोकस्य भूमिकायामुल्लिखति, यत्- काव्यस्याङ्गरूपेण स्थिता रसध्वन्यलङ्कारादिषु प्रधानताविषये साहित्यशास्त्रस्याचार्येषु मतभेदाः सञ्जाताः । त एव भेदसिद्धान्ताः सम्प्रदायरूपेण विकसिताः । तेषां षट्सङ्ख्या विद्यते, यत्- रस-ध्वनि-अलङ्कार-रीति-वक्रोक्ति-औचित्यञ्चेति । तत्र समालोचक एतेषां केवलं परिचयमेव प्रस्तौति । ( त्रिपाठी, १९९९ : ११)

पौरस्त्यसमालोचको वेणीमाधवढकालः काव्यदीपिका इत्याख्यलक्षणग्रन्थस्य भूमिकायां संस्कृतकाव्यशास्त्रस्य विकासक्रमस्य कालविभाजनपूर्वकं सम्प्रदायपरम्परायाः संङ्क्षिप्तं समीक्षणमुपस्थापयति । एष केवलं नामग्रहणपूर्वकं सम्प्रदायपरिचयमेव प्रस्तौति। अनेन तत्र प्रचलितषट्सम्प्रदायातिरिक्तौ कविशिक्षा-समन्वयसम्प्रदायौ चोपस्थापितौ । एतौ द्वावतिरिक्तसम्प्रदायौ समालोचकस्य स्वप्रतिभाजाताविव्यन्यत्र चर्चा नोपलभ्यते । वेणीमाधवः, २०५७ : ग-घ)

नैपालकः पौरस्त्यसमालोचकः केशवप्रसादोपाध्यायः, साहित्यप्रकाशः' इत्याख्ये लक्षणग्रन्थे सम्प्रदायस्य कृते 'वादः' इत्युपनाम्ना पौरस्त्यसाहित्यशास्त्रप्रसिद्धानां षट्सम्प्रदायविषयाणां विश्लेषणं करोति । तत्रानेन सम्प्रदायोत्पत्तेर्विषये किमपि नोल्लिख्य रसध्वन्यादिषट्सम्प्रदायविषयिकी चर्चा एव विहिता । (उपाध्यायः, २०६७ : १९७)

पौरस्त्यसम्प्रदायस्येतिहासपरम्परा प्राचीनतमा विद्यते । अतस्तस्य विषये चर्चाऽपि सर्वत्र प्राप्यते । केचन विद्वांसोऽस्योत्पत्तेर्बीजविषये केचन स्वरूपविषये च मतमतान्तराणि प्रस्तुवन्ति । एकत्रैव संस्कृतशास्त्रीयसम्प्रदायस्य सर्वाङ्गरूपा सुस्पष्टा चर्चा नोपलभ्यते । अतोऽत्र सरलतया संस्कृतशास्त्रीयसम्प्रदायसन्दोहस्य ज्ञानलाभार्थं बीजस्वरूपप्रदर्शनपूर्वकं विवेचनं क्रियते ।

## विषयविश्लेषणम्

### पौरस्त्यसम्प्रदायपरम्परा

काव्यकृतावावश्यकतत्त्वमध्ये एकस्य विशिष्टीकरणमेव सम्प्रदायविकासबीजं मन्यते । आभरतादधुना पयर्न्तं संस्कृतकाव्यशास्त्रे सम्प्रदायबाहुल्यं प्राप्यते । अस्य कारणं विद्यते यत्-

काव्यतत्त्वस्य प्राधान्यविषये मतभेदः । संस्कृतकाव्यशास्त्रे मतैक्यमतिरिच्य मतवैभिन्यस्य बाहुल्येन अनेके विचारवर्गाः सञ्जाता दृश्यन्ते । तेषु यत्र विचारप्रवर्तकविदुषः प्रौढतर्कशक्त्या अन्ये बहुसङ्ख्यका विद्वांसः समाबद्धा त एव सम्प्रदायनाम्ना प्रसिद्धाः । अधुना प्रामुख्येन षट्सम्प्रदायाः प्रचलिताः सन्ति । केचिद् विद्वांसः काव्यकृतेर्बीजतत्त्वरूपेण रसं स्वीकुर्वन्ति, ते रससम्प्रदायस्यानुयायिनः कथ्यन्ते । एवमेव काव्यस्यात्मा ध्वनि इति मन्यमाना विद्वांसो ध्वनिसम्प्रदायसमर्थकाः, उष्णतया विनानलमिव उपमाद्यलङ्कारैर्विना काव्यं भवत्येव न इति मन्यमाना अलङ्कारसम्प्रदायवर्गे समागच्छन्ति । तथैव वक्रोक्तिः, रीतिः, औचित्यञ्चेतेषु तत्त्वेषु विद्वद्भिर्यं यं तत्त्वं काव्यात्मत्वेन परिभाषितवन्तः तं तं तत्त्वं सम्प्रदायरूपेण विकसितमिति । अधुना संस्कृतकाव्यशास्त्रे प्राधान्येन विवेचनविषयभूता रस-ध्वनि-अलङ्कार-रीति-वक्रोक्ति-औचित्यप्रभृतयः षट् सम्प्रदायाः प्रसिद्धाः ।

**रससम्प्रदायः** रससम्प्रदायः संस्कृतसाहित्यशास्त्रस्य सर्वप्राचीनः प्रौढः सर्वाधिककाव्यशास्त्रिभिरनुमोदितश्च सम्प्रदायोऽस्ति । रसविषये प्राचीनतमोल्लेखः ऋग्वेदे प्राप्यते । ‘रसो वै स रस एवायं लब्ध्वाऽऽनन्दी भवति’ इति वेदस्यार्थविस्तारकेषूपनिषत्स्वपि रसस्य चर्चा प्राप्यते । परं स्पष्टरूपेण रससम्प्रदायस्याधारत्वेन तु भरतस्य नाट्यशास्त्र एव शास्त्रीयविवेचनं प्राप्यते । नाट्यशास्त्रस्य षष्ठसप्तमाध्याययोः सविस्तारेणास्य वैज्ञानिकं विश्लेषणं समुपलभ्यते । एतदेव तथ्यमधुना विद्वांसः स्वीकुर्वन्ति । अतः साम्प्रतिकैः पौरस्त्यसमालोचकैर्भरतमुनिरेव रससम्प्रदायस्य प्रारम्भिकाचार्यः स्वीक्रियते । आचार्यभरतेन केवलं नाट्यमुद्दिश्य नाट्यरसो विवेचितः । परमेतद् रसविवेचनमेव संस्कृतसाहित्यशास्त्रस्य कृते महत्त्वपूर्णा प्राप्तिः सञ्जातः । परवर्तिभिराचार्यैर्वाक्यं रसात्मकं काव्यमित्युल्लिख्य काव्यस्यात्मतया रसतत्त्वं स्थिरीकृतम् । अनेन नाट्यशास्त्रे ‘विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः’ इति सङ्क्षिप्तं रससूत्रं प्रस्तुतम् । (भरत, १९८० : २७४) रससूत्रस्यास्यावरणं यादृशं स्वल्पं दृश्यते, तदतिरिच्य महत्त्वं तु व्यापकं प्रतीयते । यद्यपि कस्यचन रमणीयनाट्यावलोकनेन काव्यश्रवणेन वा रसिकजनचेतसि यो ब्रह्मास्वादसहोदरश्चमत्कारात्मक आनन्दोऽनुभूयते स एव रसशब्देनाभिधीयते इति अस्य रससूत्रस्याशयो बुध्यते । किन्त्वस्य सूत्रस्य विश्लेषणविधौ नैका विद्वांसः स्वकीयं भाष्यपाण्डित्यं विवेकवैभवञ्च प्रदर्शितवन्तः । पण्डितराजो जगन्नाथस्तु एकादशसङ्ख्यकान् व्याख्याप्रकारान्नुल्लेखयति । तेषु प्रौढशास्त्रीयतर्कानुप्राणितानि विद्वत्समाजप्रथितानि शास्त्रीयमतानि चत्वारि सन्ति । मीमांसाशास्त्रविशारदस्य भट्टलोल्लटस्योत्पत्तिवादः, न्यायशास्त्रमर्मज्ञस्य श्रीशङ्कुकस्यानुमितिवादः, भट्टनारायणस्य भुक्तिवादः, अलङ्कारशास्त्रकोविदस्याभिनवगुप्तस्याभिव्यक्तिवादश्चेति । एतेषु

रससूत्रव्याख्यामतेषूत्तरोत्तरेण व्यवहारिकं सर्वैरनुमोदकं मतं मन्यते । अतश्चरमक्रमे समागतमभिनवगुप्तस्य मतं काव्यप्रयोजनानुकूलं प्रायशः सर्वैर्विद्वद्भिरादृतञ्च विद्यते ।

भरतोत्तरवर्तिभिराचार्यै रससूत्रस्याभिनवगुप्तकृताया व्याख्याया दृष्ट्या एव रसव्याख्या विहिता । रसवादानुयायिनो मम्मटो विश्वनाथश्च अनया सरण्या एव स्वकीयं रसप्रधानात्मकं मतमुपस्करोति । अनयोर्मते स्थायिभावा अस्माकं हृद्येव सुसुप्तावस्थायामवस्थिता भवन्ति, न त्वन्यतः समागच्छन्ति । तादृशाः स्थायिभावा एव विभावादिभिर्व्यक्ता रसरूपे परिणता भवन्ति । (मम्मटः, १९६४ : २७३) प्राक् संस्कारगता रतिशोकक्रोधादय मानवहृदये स्थायिरूपेणावस्थिता भवन्ति । त एव रत्यादिस्थायिभावाः साधनभूतैर्विभावादिभिर्व्यङ्ग्यव्यञ्जकसम्बन्धेन जलवर्षणे मृत्तिकायाः स्वगन्धाभिव्यक्तिवत् शृङ्गारादिरसरूपे परिणीयन्ते । अस्मिन्नवस्थायां काव्यपठनश्रवणनाट्यावलोकनमग्नो रसिक आनन्दोऽनुभुयते, प्रपाणकरसवत् रसास्वाद्यते च ।

रससङ्ख्याविषये रसवादिनो वैमत्यमनुदृश्यते । अस्य सम्प्रदायस्य प्रणेतुर्नाट्य शास्त्रकर्तुर्भरताचार्योऽष्टावेव रसान् समुल्लिखति । (भरतः, १९८० : ३०३) तदनुवर्तिनो विद्वांसः शान्ताख्यं नवमरसमपि स्वीकुर्वन्ति । आचार्यो रुद्रटः प्रेयान् नामकं दशमरसमुल्लिखति । आचार्यो विश्वनाथो वात्सल्यरसस्यावधारणां पुरस्करोति । केचन भक्तिरसस्य कृतेऽपि स्वकीयां तर्कशक्तिं प्रसारयन्ति । भवभूतिस्तु 'एको रसः करुण एव' इति नवीनां धारणां प्रकटयति, परमधुना संस्कृतसाहित्यशास्त्रपरम्परायां नवरसा एव सर्वस्वीकार्यतया स्थिरीभूताः सन्ति । (विश्वनाथः, १९७५ : २८३)

रससम्प्रदायानुयायिनो विद्वांसः कृतेरात्मतया रसतत्त्वमेव स्वीकुर्वन्ति । विचारोऽयमस्य सम्प्रदायस्य बीजरूपो मन्यते । अन्य सम्प्रदायसम्बद्धा लक्षणशास्त्रकर्तारो विद्वांसोऽपि मतमिदं प्रत्यक्षतया तु नैव परं प्रकारान्तरेणापि आदृयन्त एव । कर्तृत्वशक्तिसम्पन्नस्य कस्यापि कवेः कृतिमधित्य रसिकजनः काव्यात् परमानन्दानुभूतो मया इत्यादिरूपेण स्वकीयं काव्यसेवनस्यानुभवमनुवदन्ति । एतादृशः परमानन्दात्मकस्तु रस एव भवितुमर्हति । काव्यरचनायाः प्रारम्भादुपसंहारपर्यन्तं रसस्यैव प्रामुख्यं मन्यते । तस्माद् रसवादिभ्यो मतमिदमवितथं प्रतिभाति । अत एवाभरतादद्य पर्यन्तं रससम्प्रदायः सर्वान् सम्प्रदायानतिरिच्य रसिकजनमनांसि सम्मोदमाविष्कुर्वन् सर्वोत्कर्षेण विराजते ।

***ध्वनिसम्प्रदायः*** संस्कृतसाहित्यशास्त्रपरम्परायां ध्वनिसम्प्रदायस्य स्थानमतीव गौरवपूर्णमास्ते । सम्प्रदायस्यास्य विद्वांसः गूढार्थात्मकध्वनितत्त्वमाविष्कृत्य काव्यशास्त्रं विशेषविभवसम्पन्नमकार्षुः । प्राक् पश्चाद् वा येषां शास्त्रीयसिद्धान्तानां विकासः समभवत् तेषां ध्वनिना साकं सामञ्जस्यस्थापनमस्य

सम्प्रदायस्य महत्त्वपूर्णा प्राप्तिरस्ति । ध्वनितत्त्वस्य कल्पनायाः विषये साहित्यशास्त्रिणो वैयाकरणानां कृतज्ञाः सन्ति । व्याकरणशास्त्रज्ञैर्विद्वद्भिः साहित्यशास्त्रे ध्वनिस्थापनात् प्रागेव स्फोटतत्त्वस्य कल्पनां कृतवन्तः । व्याकरणशास्त्रे विवेचितस्फोटप्रेरणया साहित्यशास्त्रिणो ध्वनेः कल्पनां कृतवन्तः । (आनन्दवर्धनः, २०४२ : ५३) आनन्दवर्धनाचार्यो ध्वनिसम्प्रदायस्य संस्थापको विद्यते । एषोऽभाववादः, भाक्तवादः, अनिर्वचनीयतावादश्चेति ध्वनिविरोधिमतत्रयं परिकल्य तान् सतर्कं निरस्य ध्वनिसिद्धान्तमुपस्थापयति । ध्वनिकारो ध्वन्यालोकस्य प्रारम्भ एव प्रसङ्गोऽयं पुरस्करोति, यथा-

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥

(आनन्दवर्धनः, पूर्ववत् : ३)

अस्य प्रौढविचारमण्डितो ध्वनिसिद्धान्तः पश्चवर्तिभिराचार्यैरपि पूर्णरूपेणाभिनन्दितः। तदारभ्य अद्यावधिरपि रससम्प्रदायस्य परिपोषकरूपेण ध्वनिसिद्धान्तस्यैव वर्चस्वमास्ते । यद्यपि कुन्तकभट्टनायकमहिमभट्टप्रभृतयोऽनेके विद्वांसः सिद्धान्तमिममस्वीकुर्वन् विरोधमकार्षुः । तेषां ध्वनिविरोधिमतान्नेव आनन्दवर्धनेन अभाव-भाक्त-अनिर्वचनीयप्रभृतीन् विकल्पान् परिकल्प्य प्रौढपाण्डित्यशैल्या खण्डनं चकार । ध्वनिविरोधिनां विरोधिमतेन ध्वनिमहत्त्वं नावरुद्धम्, प्रत्युत परिमार्जनेन कषणोपले स्वर्ण इव ध्वनेरुज्ज्वलमहिमा वर्धतेतराम् । अस्य सम्प्रदायस्यानुयायिनो मम्मट-अधिनवगुप्त-विश्वनाथ-जगन्नाथप्रभृतयो विद्वांसो विद्यन्ते ।

ध्वनेः स्वरूपनिर्धारणक्रमे ध्वन्यालोके ध्वनिकारः 'उपसर्जनीकृतः स्वार्थौ शब्दार्थौ व्यङ्क्तः प्रतीयमानार्थ एव ध्वनि इति ध्वनिविरोधिमतखण्डनपुरस्सरं ध्वनिस्वरूपं प्रस्तौति। (आनन्दवर्धनः, पूर्ववत् : ३७) सामान्यार्थमतिरिच्य रसिकजनाकर्षणशीलो योऽर्थः शब्दाद् व्यज्यते स एव ध्वनिः । ध्वनितत्त्वस्यैव विलक्षणार्थपरिपोषणार्थमन्येऽलङ्कार- गुणरीतिप्रभृतयः समर्पिता भवन्तीति ध्वनिवादिनां मतम् । मतमिदं सत्यमेव प्रतिभाति कथमिति चेत् सामान्यार्थज्ञानं तु यस्मात् कस्मादपि लेखविशेषाद् भवत्येव परं प्रतिभाशक्तिसम्पन्नकवेः काव्यात्तु कमनीयकमनतिवर्तमानस्यार्थस्यानुभूतिरपेक्षते, न तु सामान्यार्थमात्रमतः काव्यस्य कृते प्रतीयमानार्थरूपो ध्वनिरेवात्यावश्यकं काव्यस्यात्मरूपं तत्त्वमिति ।

रससम्प्रदायस्य सहसम्प्रदायत्वेन ध्वनिसम्प्रदायो मन्यते । ध्वनिवादिनो रसमुत्तमध्वनिरूपेण स्वीकुर्वन्ति । तेषां मते रसालङ्कारवस्तुप्रभृतिषु ध्वनिभेदेषु रसध्वनिरेवोत्तमध्वनिरिति । रसध्वनि एव काव्यस्यात्मरूपेणावस्थितो भवति । तस्माद् ध्वनेः काव्यस्यात्मा इति कथनं तु सामान्यमास्ते । वस्तुतस्तु रसध्वनिरेव काव्यस्यात्मा भवति । ध्वन्यालोकस्य लोचनटीकायामभिनवगुप्तो रसध्वनेः

प्रधान्यं स्वीकरोति, यथा- 'तेन रस एव वस्तुत आत्मा, वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण ध्वनिकाव्यस्यात्मा इति सामान्येनोक्तम् ।' ( अभिनवगुप्तः, १९९२ : ८६)

ध्वनिवादिनः गुणरीत्यलङ्कारादिकाव्यतत्त्वविषये समन्वयात्मिकी धारणा प्रस्तुवन्ति। एतेषां काव्यतत्त्वरूपेण प्रसिद्धस्य कस्यापि तत्त्वस्य विषये निषेधात्मको विचारः कुत्रापि न लभ्यते । ध्वनिवादिनो मानवशरीरवत् काव्यशरीरेऽपि सर्वेषां काव्यतत्त्वानां समवायत्वं स्वीकुर्वन्ति । एतेषां मते काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलावद् भवन्ति । ( विश्वनाथः, १९९५ : २१) ध्वनिवादिनामेतादृशी समन्वयात्मिकी धारणा एव ध्वनिसम्प्रदायं सर्वस्वीकार्यं विधातुं प्रभवति । सूक्ष्मतया विनिभालनेन रससम्प्रदायस्य प्रौढविवेचनरूपेण ध्वनिसम्प्रदायो विकसित इति मन्तुं युज्यते । ध्वनिसम्प्रदायस्य प्रौढविश्लेषकस्याभिनवगुप्तस्य सर्वसम्प्रदायमैत्री ध्वनिगता धारणा एव सम्प्रदायमिममधुना पर्यन्तं संस्कृतसाहित्यशास्त्रभूमौ सर्वोत्कृष्टरूपेण जयति ।

**अलङ्कारसम्प्रदायः** प्राक् कोऽयमलङ्कार ? इति जिज्ञासायां काव्यसमीक्षैवालङ्कार इत्यलङ्कारशब्दस्य प्राचीनोऽर्थः प्राप्यते । यतो हि तदा काव्यशास्त्रीयग्रन्थाः काव्यालङ्कारनाम्ना प्रकाशिताः । तत्र केवलमलङ्कारतत्त्वमेव नापितु पूर्णतया काव्यतत्त्वसमीक्षा प्राप्यते । रसध्वनिसम्प्रदाययोरुदयात् प्राक् जाता विद्वांसोऽलङ्कारमेव काव्यस्यानिवार्यतत्त्वं स्वीकुर्वन्ति स्म । तेषामलङ्कारप्रधानं मतमेव संस्कृतसाहित्यशास्त्रेऽलङ्कार-सम्प्रदायरूपेण विकसितम् ।

अस्य सम्प्रदायस्य प्रवर्तकोऽस्ति भामहाचार्यः । अस्य काव्यालङ्कारोऽलङ्कारसम्प्रदायस्याधारग्रन्थो मन्यते । तत्रालङ्कार एव काव्यस्यानिवार्यं तत्त्वमित्युद्घुष्यन् सविस्तारेणालङ्कारचर्चा लभ्यते । न कान्तमपि निर्भूषं विभाति वनिताननम् इत्युल्लिख्यो भामहाचार्यः काव्यस्य कृतेऽरलङ्कारस्य काव्यात्ममयं महत्त्वमुपस्थापयति । (भामहः, १९८५ : ७) उद्भट-रुद्रट-रुय्यक-प्रतिहारेन्दुराज-जयदेवप्रभृतयोऽस्यैव मतानुयायिनः सन्ति । जयदेवस्तु 'यथा औष्ण्येन विनानलमसम्भवं तथैवालङ्कारेण विना काव्य'मिति तर्कप्रकर्षमुपस्करोति । काव्यस्य सर्वस्वमेवालङ्कारतत्त्वमिति मन्यमानानामेतेषां मतं सर्वैरलङ्कारशास्त्रिभिर्नाभिनन्दितम् । तथापि तेषां ग्रन्थे रसध्वनिविरोधिविवेचनं कुत्रापि न लभ्यते, प्रत्युत प्रकारान्तरेण रसतत्त्वस्य समर्थनमेव प्राप्यते । अलङ्कारसम्प्रदायस्य संस्थापको भामहः काव्यालङ्कारग्रन्थे रसवदाद्यलङ्काररूपेण रसं स्वीकरोति । आचार्यो दण्डी रसाभिनिवेशस्योपदेशं करोति । एते समासोक्त्यप्रस्तुतप्रशंसाप्रतीपाद्यलङ्कारेषु

प्रतीयमानार्थस्य स्वरूपं प्रकाशयन्नपि वाच्यार्थस्योपकारकरूपेण तत्रैवान्तर्भावयन्ति । रससम्प्रदायानुयायिनोऽप्यलङ्कारतत्त्वं पूर्णतया नास्वीकृतम् । ते काव्यशरीरभूतस्य शब्दार्थतत्त्वस्य सौन्दर्यवर्धकत्वेन काव्यशोभाप्रयोजका अलङ्कारा इति सादरमलङ्कारस्यास्तित्वं स्पष्टरूपेण मानन्त्येव । ध्वनिवादिनः स्वकीये लक्षणशास्त्रेऽलङ्कारस्य सविस्तारेण स्वरूपोदाहरणपूर्वकं विवेचनञ्च कृतवन्तः । अधुना रसध्वनिरेव काव्यस्यात्मभूमौ स्थिरीभूतत्वादेतेऽलङ्कारवादिनो देहवादिनो मन्यन्ते ।

अलङ्कारस्य विकासः कालक्रमेण शनैः शनैरभवत् । आद्याचार्यो भरतश्चतुर्णामेवालङ्काराणां नामनिर्देशं करोति । ततो भामहोद्भटरुद्रटजयदेवादयो विद्वांसोऽलङ्कारप्रवर्धने स्वलक्षणग्रन्थेषु सविस्तारविश्लेषणं कुर्वन्ति । कालक्रमेणालङ्कारस्य सङ्ख्यायां तीव्रतया वृद्धिरभवत् । कुवलयानन्दकारोऽप्पयदीक्षितस्त्वलङ्कारस्य पञ्चविंशत्यधिकां शतसङ्ख्यामुल्लिखति । सामान्यतया प्रयोगाधिक्येन षष्ठीरारभ्य असीतिपरिमिता अलङ्कारसङ्ख्या नैकैः काव्यशास्त्रिभिर्विश्लेषिता लभ्यते ।

भामहाचार्यादारभ्य अद्यपर्यन्तमाचार्यप्रवरैः प्रवर्धितः गौरवपूर्णोऽलङ्कारसम्प्रदायस्तत्सम्बन्धिनो लक्षणग्रन्थदृष्ट्या सम्पन्नो विद्यते । प्रायशः सर्वेषु लक्षणग्रन्थेष्वलङ्कारविषये चर्चा लभ्यते । परमलङ्कारमङ्गीकृत्य ये आचार्या काव्यस्य सर्वस्वं स्वीकुर्वन्ति तेऽतिवादिनो मन्यन्ते । स्वतन्त्रदृष्ट्या तु अलङ्कारः काव्यस्य सौन्दर्याधायकस्तत्त्वविशेष एव स्वीकर्तुं शक्यते । काव्यं सुन्दरमेव भवितुमर्हति । आभूषणरहिता वनिता रसिकानां हृदये तथा न प्रविशति यथा भूषणभारान्विता, तथैवोपमाद्यलङ्कारैर्नालङ्कृतं काव्यमपि । तस्मादेव रसध्वनिवादिनोऽपि रसवदलङ्कारध्वन्यादिनाम्ना अलङ्कारस्य महत्त्वं स्वीकुर्वन्त्येव । अधुना साहित्यशास्त्रस्य साररूपेणालङ्कारविषये निगलितोऽर्थो भवति, यत्- अलङ्कारः काव्यस्य शरीरस्थानीभूतौ शब्दार्थावलङ्कृत्य आत्मस्थानीभूतं रसमुपकुर्वन्तीति ।

**रीतिसम्प्रदायः** काव्यरचनायां वर्णपदादीनां रसानुकूलव्यवस्थापना एव रीतिर्मन्यते । काव्यशास्त्रिणां प्रौढविवेचनबलेन रीतिरपि सम्प्रदायकोटौ समारूढा अस्ति । अस्य सम्प्रदायस्य प्रवर्तको विद्यते आचार्यो वामनः । यद्यपि भरतभामहदण्ड्यादयोऽपि रीतेर्विस्तृतं विवेचनं कृतवन्तः, परमाचार्यो वामनः काव्यालङ्कारसूत्रवृत्तौ रीतितत्त्वं महत्त्वपूर्णं स्थानं प्राददात् । तत्र 'रीतिरात्मा काव्यस्य' इत्युल्लिख्य रीतितत्त्वं काव्यस्यात्मस्थानीभूतं स्वीकृतम् । (वामनः, २०४७ : १४-१५)

रीतेः परम्परा प्राचीनतमा विद्यते । अस्य प्राचीनं नाम मार्गः प्राप्यते । तदा वैदर्भीमार्गः सर्वगुणाश्रयरूपेण स्वीकृतमासीत् । गौडीयमार्गस्तु निन्दनीय इति भामहः काव्यालङ्कारे समुल्लिखति । (भामहः, १९८५ : १७) अनन्तरं विकासक्रमे वैदर्भी, गौडीया, पाञ्चाली, लाटी इति चतस्र रीतयः प्रसिद्धाः । इमानि रीतिनामानि देशभेदानवलम्ब्य सञ्जातानि ज्ञायन्ते । भोजराजोऽपि देशभेदानाश्रित्य

तासु आवन्ती, मागधी च समाविश्य रीतिनां षाड्विध्यं प्रतिपादयामास । आचार्यः कुन्तकस्तु देशभेदेन रीतिभेदस्वीकारे रीतिनामानन्त्यमाशङ्क्य सुकुमारः, विचित्रः, मध्यममार्गश्चेति त्रिधा विभजति । अनया दृष्ट्या रीतेर्नामसङ्ख्यादिविषये वैविध्यं दृश्यते । परं ध्वनिसम्प्रदायस्योदयादनन्तरं वैदर्भी, गौडी, पाञ्चाली, लाटी इति रीतेश्चतस्रः सङ्ख्या एव स्थिरीभूता लभ्यते ।

रीतिसम्प्रदायसम्बद्धैराचार्यैः काव्यस्यात्मस्थानीयत्वेन रीतितत्त्वं स्वीकृतम् । काव्यात्मतत्त्वान्वेषणक्रमे विद्वांसस्तस्य सामीप्यं प्राप्यापि ध्वनिरूपस्य काव्यात्मतत्त्वस्य स्वरूपप्रकाशने असमर्थाः सन्त रीतितत्त्वस्य प्रवर्धनं कृतवन्त इति ध्वनिकारः ध्वन्यालोक समुल्लिखति यत्- 'अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् । अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः' इति । ( आनन्दवर्धनः, पूर्ववत् : ५७७)

अत रीतिवादिनो वर्णिता वर्णरचनासम्बद्धा रीतिः काव्यस्यात्मा भवितुं नार्हतीति रसध्वनिवादिनां मतम् । अनयोर्मतयोः स्वतन्त्रदृष्ट्या विनिभालनेन रीतिवादिनां मतं सर्वग्राह्यं न दृश्यते । काव्ये पदानां व्यवस्थितरूपेण स्थापनं वा सङ्घटनमेव रीतेर्लक्षणम्। तस्माद् रीतिर्वर्णरचनायामाश्रित्य काव्यस्यात्मस्थानीभूतं रसमुपकरोतीति काव्यस्यात्मन उपकृतिपक्ष एव व्यवस्थिता भवति । रसप्रतीतौ रीतेर्भूमिका महत्त्वपूर्णा भवति । रसानुकूला पदसङ्घटना नास्ति चेद् रसप्रतीतौ बाधा जायते । अतो रीतितत्त्वं काव्यस्यात्मास्थानीभूतं रसमुपकरोति न तु काव्यस्यात्मरूपा भवतीति स्थिरीभूतः सिद्धान्तो मन्यते ।

**वक्रोक्तिसम्प्रदायः** वक्रा सामान्येतरा उक्तिरेव वक्रोक्तिरिति वक्रोक्तिशब्दस्य सामान्यार्थो ज्ञायते । पौरस्त्यकाव्यशास्त्रे शब्दस्यास्य प्रयोग प्राचीनकालादेवाभवत् । तदा काव्यशास्त्रीयविद्वांसः कश्चनातिशयकथनस्य सत्तां स्वीकुर्वन्ति स्म । सामान्यार्थभिन्ना वक्रिमायुता वाणी एव वक्रोक्तिशब्दस्य सामान्यार्थो ज्ञायते । ऐतिहासिकदृष्ट्या वक्रोक्तेः प्राथमिकी कल्पना भामहश्चकार । तस्य मते वक्रोक्तिरतिशयोक्तिकथनस्य पयार्यरूपेण प्रयुज्यते । भामहो वक्रोक्तिं काव्यस्य सर्वत्र व्यापकं मूलतत्त्वमेवेति स्वीकरोति । 'सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते । यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥' (भामहः, पूर्ववत् : ६१) आचार्यो दण्डी सम्पूर्णवाङ्मयमेव स्वभावोक्तिर्वक्रोक्तिरिति भागद्वयं विभजति । वामनस्य वक्रोक्तिमतं भामहाद् नितरां भिद्यते । भामहमते वक्रोक्तिः सर्वेषामलङ्काराणां मूलरूपा परं वामनमते सादृश्यमूला लक्षणरूपा । (वामनः, पूर्ववत् : १६४) रुद्रटस्य मते कमपि विभिन्नार्थकशब्दं श्रुत्वा तस्यावाञ्छितमकल्पितञ्चोत्तरं ददाति सा वक्रोक्तिरिति । कुन्तकस्तु एतेभ्यो भिन्नमेव मतमुपस्थापयति । स काव्यस्य प्राणरूपा वक्रोक्तिरिति

प्रौढतर्कमयैर्वचनैः प्रस्तौति । (कुन्तकः, पूर्ववत् : १९४) एष आचार्यप्रवरो लोकोत्तरचमत्कारवैचित्र्ययुता सहृदयाह्लादकारिणी उक्तिरेव वक्रोक्तिरिति परिभाषते, यत्- 'लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये । काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥' (कुन्तकः, पूर्ववत् : १९४) (कुन्तकः, पूर्ववत् : ७)

राजानकः कुन्तकः प्राग्जातैराचार्यै सामान्यरूपेण स्वीकृतं वक्रोक्तिं काव्यस्य जीवितत्त्वमिति दृढतया उपस्थाप्य संस्कृतसाहित्यशास्त्रे नवीनं विवेच्य विषयं पुरस्करोति। वक्रोक्तिं काव्यस्यात्मारूपेण स्थापयितुं कुन्तकः स्वकीयलक्षणग्रन्थस्य नाम एव वक्रोक्तिकाव्यजीवितमिति विदधाति । ग्रन्थेऽस्मिन् कुन्तकः स्वप्रतिभाबलेन स्वपूर्वजैः स्थापितानि सर्वाणि काव्यतत्त्वानि वक्रोक्तावन्तर्भावयति । विलक्षणतर्कशक्त्या कुन्तकः स्वकीयं नवीनमतं रसध्वन्यलङ्कारकोटौ प्रापयितुं सफलोऽभूत् । काव्यशात्रस्येतिहासे काव्यस्यात्मस्थानीभूतं वक्रोक्तिविषयकमस्य मतं सर्वैर्नानुमोदितं तथापि पौढपाण्डित्यपूर्णैर्विचारैः प्रस्तुता वक्रोक्तिः सम्प्रदायरूपेणादृता एव ।

कुन्तकः स्वकीये वक्रोक्तिजीविताख्ये लक्षणग्रन्थे वक्रोक्तेः षट् भेदान् प्रस्तौति । वर्णवक्रता, पदपूर्वार्धवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता चेति कुन्तकस्य वक्रोक्तिर्भेदाः सन्ति । कुन्तकः संस्कृतसाहित्यशास्त्रपरम्परायां प्राग्जातैराचार्यैः स्थापितान् रसध्वन्यलङ्कारादितत्त्वान् वक्रोक्तेः षट्भेदेष्वेवान्तर्भावयति ।

संस्कृतकाव्यशास्त्रे कुन्तकस्य वक्रोक्तेः कल्पना औदार्यपूर्णा विपुला च विद्यते, यस्मादत्र सर्वेऽलङ्काराः, सर्वे ध्वनिभेदाश्च समाहिता । रसध्वनिविषये पूर्णतया परिचितोऽपि कुन्तकः स्वकीयविलक्षणप्रतिभाबलात् तान् सर्वान् वक्रोक्तौ समाविश्य सा एव काव्यस्य जीवितभूता इति सुदृढं मतं प्रस्तौति । अस्य विवेचनात्मिकी, विश्लेषणात्मिकी च प्रतिभाशक्तिरतीव विलक्षणा विद्यते । अस्य वक्रोक्तिर्विषयिकी मौलिकी धारणा विश्ववाङ्मय एव असामान्या मन्यते । अस्य वक्रोक्तिसिद्धान्तः पाश्चात्त्यकाव्यशास्त्रे प्रसिद्धस्य क्रोचे इत्यस्य कलावादस्य समकक्षतां भजते । तस्मादेव अस्य वक्रोक्तिविचारोऽधुनापि आदरणीयो विद्यते ।

**औचित्यसम्प्रदायः** उचितस्य भाव औचित्यमिति काव्ये काव्याङ्गानामौचित्यानुसारेण निवेशनं काव्यसौन्दर्यप्रकाशकं भवति, अन्यथा हास्यास्पदमेव । लोके यथा मानवौचित्यानुकूलकार्यकर्ता जनो महत्प्रतिष्ठां प्राप्नोति, स एवानौचित्यमार्गे प्रचलति चेत् गर्हणीयमुपहास्यपात्रञ्च भवति, तथैव रसालङ्कारगुणरीत्यादिनामौचित्येन निवेशनं काव्यसौन्दर्यं जनयति अन्यथा तु उपहास्यतामेतीति व्यवहारिकं तथ्यमाधृत्य क्षेमेन्द्राचार्यः काव्यस्यात्मस्थानीभूतमौचित्यमिति स्वकीयं

शास्त्रीयमतमुपस्थापयति । क्षेमेन्द्रोऽव्यवहारिकं कार्यं कथमुपहास्यतामेतीति लौकिकोदाहरणेन प्रमाणयति, यथा-

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा

पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।

शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-

मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः ॥ (क्षेमेन्द्रः, १९१० : १०)

संस्कृतकाव्यशास्त्रे औचित्यतत्त्वस्य परम्पारा प्राचीना विद्यते । आचार्यो भरतो नाट्यशास्त्रे व्यवहारौचित्यमुल्लिखति । आचार्यो भामहोऽपि सन्निवेशविशेषात् काव्यदोषोऽपि निर्दोषतामेति । 'सन्निवेशविशेषात्तु दुरुक्तमपि शोभते ।' (भामहः, पूर्ववत् : २६) ध्वनिकार आनन्दवर्धनस्तु स्पष्टरूपेणौचित्यस्य चर्चां करोति । रसदोषस्य व्याख्यावसरे रसभङ्गस्य मुख्यं कारणमेवानौचित्यमिति समुल्लिखति । 'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥'( आनन्दवर्धनः, पूर्ववत् : १८६-१९०) ध्वन्यालोकस्यैव लोचनटीकाकारेणाभिनवगुप्तेन तु औचित्यमात्रपक्षपातिनामाचार्याणां मतानि विखण्ड्य ध्वन्यौचित्यसिद्धान्तयोः परस्परमुपकारभावसम्बन्धः सूचितः । परमस्यैव एको विलक्षणप्रतिभासम्पन्नः शिष्यः क्षेमेन्द्रो ध्वनिसिद्धान्तज्ञोऽपि स्वविश्लेषणप्रतिभाबलात् औचित्यविचारचर्चा इति ग्रन्थस्य माध्यमेन औचित्यसिद्धान्तं सम्प्रदायरूपेण विवेचनयोग्यं विदधाति । औचित्यविषयकं पूर्वाचार्यमतमादृत्य क्षेमेन्द्र औचित्यस्य स्वरूपं निर्धारयति, यत्- 'उचितं प्राहुराचार्याः सदृशं किल यस्य तत् । उचितस्य च यो भावस्तदौचित्यं प्रचक्षते॥' (क्षेमेन्द्रः पूर्ववत् : १२) एष औचित्यस्य व्यवहारिकं तथ्यं प्रदर्श्य काव्यरचनायामनिवार्यत्वमुद्घोषयति ।

औचित्यविचारचर्चायामाचार्यः क्षेमेन्द्र औचित्यस्यानेकान् भेदान्नुल्लिख्य सर्वेषां काव्याङ्गानामौचित्यमावश्यकत्वं ज्ञापयति । एष स्वग्रन्थे पदौचित्यम्, वाक्यौचित्यम्, अर्थौचित्यम्, रसौचित्यम्, कारकौचित्यम्, लिङ्गौचित्यम्, वचनौचित्यमित्यादीनामौचित्य- भेदानां निरूपणमकार्षीत् (क्षेमेन्द्रः, पूर्ववत् : १२) ।

पौरस्त्यकाव्यशास्त्रे प्रायः काव्यशास्त्रिभिः समादृतमौचित्यतत्त्वं क्षेमेन्द्रः प्रौढतया विविच्य सम्प्रदायरूपेणोपस्थापयितुं समर्थो भवति । एष खण्डनमण्डनादिकं विनैव काव्यतत्त्वेष्वौचित्यस्यावश्यकत्वं पुष्णाति । अन्येऽपि काव्यसिद्धान्तव्याख्यातारोऽस्य सिद्धान्तस्य प्रतिवादं न कुर्वन्ति । काव्यस्यात्मत्वेन स्थापितस्य रसस्यानुभूतावप्यौचित्य- मावश्यकमिति विवेचकस्य गुरोरानन्दवर्धनस्यौचित्यविषयकं मतमेव क्षेमेन्द्रस्य 'औचित्यं काव्यजीवित'मिति

सिद्धान्तस्य बीजं मन्यते । विचारबाहुल्येऽपि क्षेमेन्द्रस्यौ- चित्यसिद्धान्तोऽन्येषु काव्यसिद्धान्तेषु मैत्रीसम्बन्धं स्थापयति । सामान्यतया काव्यसाधकैरपि सत्काव्यरचनायामौचित्यविषयेऽपि सावधानेन भाव्यमिति निगलितोऽर्थः

## उपसंहारः

प्रतिभावतः कवेः कर्म काव्यमिति काव्यरूपा कृतिः सामान्यलेखनादतिरिक्तं विलक्षणानन्दप्रदमेव भवितुमर्हति । सत्काव्यरचनायामावश्यककाव्याङ्गनिर्धाणविधौ सञ्जातेभ्यो मतभेदेभ्योऽनेके सम्प्रदाया विकसिताः । पौरस्त्यसाहित्यशास्त्रे प्रतिभाशक्तिसम्पन्नैः समालोचकैः प्रौढतर्कबलेन स्थापिताः सम्प्रदायाः प्रतिष्ठिताः सन्ति । तेषु यस्मिन् काव्याङ्गविषये समालोचकैः प्रौढमतानि प्रदर्शितानि तानि सर्वाण्यपि गौरवगुणगुम्फितानि सन्ति । तस्मिन् सन्दर्भे विद्वद्भिः स्वप्रतिभापाण्डित्येन स्वकीया धारणा एव प्राधान्येनाङ्गीकर्तव्या इत्युद्घोषिता । विशेषतया काव्यस्यात्मस्थानीभूतं तत्त्वं किमिति विषये विवेचनपरम्परा एव जाता । तत्क्रमे पौरस्त्यसमालोचनापरम्परायाः गौरवभूतो विश्ववाङ्मये प्रसिद्धः सम्प्रदायसन्दोहो विकसितः । तेषु ध्वनिसम्प्रदायप्रवर्तकैर्ध्वनिवादिभिः काव्याङ्गविषये या धारणा प्रस्तुता सा एव प्रायशः समालोचकैरभिनन्दिता विद्यते । काव्यस्यात्मभूतं रसध्वनितत्त्वमेव भवितुमर्हति । वस्तुतस्तु शब्दार्थसाहित्यसम्भूतै- रलङ्काररीत्यौचित्यादिभिश्च वाङ्मयव्यापकरसस्पर्शैर्गुणैरगुणैर्वा परिसेव्यते रसः । रसस्पर्शहीना न केचिदपि शब्दार्थसन्दर्भा इत्यंशभूतानि तत्त्वानि सर्वदांशिनमुपधावन्तीति सर्वे सम्भूय वाङ्मयस्याव्ययधामत्वं सिध्यतीति काव्यशास्त्राशयः सर्वे सम्प्रदायाशयश्च बोध्यम् । अलङ्काररीत्यौचित्यादीनि सर्वाण्यप्यङ्गभूतानि तत्त्वानि स्वांशसौन्दर्याद्रस- ध्वनिमुपकुर्वन्ति । तस्मात् पौरस्त्यसम्प्रदायपरम्परायां रसध्वनिसम्प्रदाययोरुपकारकार्ये समर्पिता एवान्यसम्प्रदायसन्दोह इति ।

## सन्दर्भसामग्रीसूची


अभिनवगुप्तः (ई.१९९२), *ध्वन्यालोकः* (लोचनटीकायुतः), चौखम्बाविद्याभवन ।

आनन्दवर्धनः (२०४२), *ध्वन्यालोकः*, चौखम्बा विद्याभवन ।

उपाध्यायः, केशवप्रसादः (२०६७), *साहित्यप्रकाशः*, साझा प्रकाशन ।

कुन्तकः (२०२९), *वक्रोक्तिजीवितम्* (च.सं.), चौखम्बा संस्कृत संस्थान ।

क्षेमेन्द्रः (ई. १९१०), *औचित्यविचारचर्चा* (तृ.सं.), चौखम्बा विद्याभवन ।

जयदेवः, (ई. १९९९) *चन्द्रालोकः*, चौखम्बा संस्कृत संस्थान ।

ढकालः, वेणीमाधवः (भूमिकालेखकः)(२०५७), *काव्यदीपिका,* प्रभालक्ष्मीराणा ।

त्रिपाठी, कृष्णमणिः (भूमिकालेखकः) (ई.१९९९), *चन्द्रालोकः,* चौखम्बा सुरभारती प्रकाशन ।

दण्डी (ई.१९९५), *काव्यादर्शः,* चौखम्बा विद्याभवन ।

दाहालः, लोकमणिः (भूमिकालेखकः) (ई.१९९५) *साहित्यदर्पणः,* चौखम्बा विद्याभवन ।

भरतमुनिः (ई. १९८०), *नाट्यशास्त्रम्,* ओरियन्टल इस्न्टिच्युट ।

भामहः, (ई. १९८५), *काव्यालङ्कारः,* विहार राष्ट्रभाषा परिषद् ।

मम्मटः, (ई. १९८३), *काव्यप्रकाशः,* साहित्यभण्डार ।

वामनः (२०४७), *काव्यालङ्कारसूत्रवृत्तिः,* (प.सं.), चौखम्बा संस्कृत संस्थान ।

विश्वनाथः (ई. १९७५), *साहित्यदर्पणः,* (प्र.सं.), चौखम्बा सुरभारती प्रकाशन ।

शास्त्री, श्रीनिवासः (ई.१९८३), *काव्यप्रकाशः,* साहित्य भण्डार ।